श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.20 - ચતુર્થ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(વઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્ભાગવતમહાપુરાણમ્

એકાદશ: સ્કન્ધ:

.. અથ વિં(મ્)શોઽધ્યાયઃ ..

ઉદ્ધવ ઉવાચ

વિધિશ્ચ પ્રતિષેધશ્ચ, નિગમો હીશ્વરસ્ય તે .
અવેક્ષતેઽરવિન્દાક્ષ, ગુણં(ન્) દોષં(ઞ્) ચ કર્મણામ્ .. ૧..

અવેક્ષતેઽ + રવિન્દાક્ષ

વર્ણાશ્રમવિકલ્પં(ઞ્) ચ, પ્રતિલોમાનુલોમજમ્ .
દ્રવ્યદેશવયઃ(ખ્)કાલાન્, સ્વર્ગં(ન્) નરકમેવ ચ .. ૨..

વર્ણાશ્ર + મવિકલ્પં(ઞ્) ,પ્રતિલોમા + નુલો + મજમ્

ગુણદોષભિદાદૃષ્ટિ-મન્તરેણ વચસ્તવ .
નિઃ(શ્)શ્રેયસં(ઙ્) કથં(ન્) નૃણાં(ન્) નિષેધવિધિલક્ષણમ્ .. ૩..

ગુણદોષ + ભિદાદૃષ્ટિ, નિષે + ધવિધિ + લક્ષણમ્

પિતૃદેવમનુષ્યાણાં(વ્઀ઁ) વેદશ્ચક્ષુસ્તવેશ્વર .

શ્રેયસ્ત્વનુપલબ્ધેઽર્થે, સાધ્યસાધનયોરપિ .. ૪..

પિતૃદેવ + મનુષ્યાણાં(વ્઀ઁ), વેદશ્ + ચક્ષુસ્ + તવેશ્વર

શ્રેયસ્ + ત્વનુ + પલબ્ધેઽર્થે , સાધ્ય + સાધ + નયો + રપિ

ગુણદોષભિદાદૃષ્ટિર્ - નિગમાત્તે ન હિ સ્વતઃ .

નિગમેનાપવાદશ્ચ, ભિદાયા ઇતિ હ ભ્રમઃ .. ૫..

ગુણદોષ + ભિદા + દૃષ્ટિર્ , નિગમેના + પવા + દશ્ચ

શ્રીભગવાનુવાચ

યોગાસ્ત્રયો મયા પ્રોક્તા, નૃણાં(મ્) શ્રેયોવિધિત્સયા .

જ્ઞાનં(ઙ્) કર્મ ચ ભક્તિશ્ચ, નોપાયોઽન્યોઽસ્તિ કુત્રચિત્ .. ૬..

યોગાસ્ + ત્રયો, શ્રેયો + વિધિત્ + સયા

નોપાયોઽન્ + યોઽસ્તિ

નિર્વિણ્ણાનાં(ઞ્) જ્ઞાનયોગો, ન્યાસિનામિહ કર્મસુ .

તેષ્વનિર્વિણ્ણચિત્તાનાં(ઙ્), કર્મયોગસ્તુ કામિનામ્ .. ૭..

તેષ્વ + નિર્વિણ્ણ + ચિત્તાનાં(ઙ્)

યદૃચ્છયા મત્કથાદૌ, જાતશ્રદ્ધસ્તુ યઃ(ફ્) પુમાન્ .

ન નિર્વિણ્ણો નાતિસક્તો, ભક્તિયોગોઽસ્ય સિદ્ધિદઃ .. ૮..

તાવત્ કર્માણિ કુર્વીત, ન નિર્વિદ્યેત યાવતા .

મત્કથાશ્રવણાદૌ વા, શ્રદ્ધા યાવન્ન જાયતે .. ૯..

મત્કથા + શ્રવણાદૌ

સ્વધર્મસ્થો યજન્ યજ્ઞૈ-રનાશીઃ(ખ્) કામ ઉદ્ધવ .

ન યાતિ સ્વર્ગનરકૌ, યદ્યન્યન્ન સમાચરેત્ .. ૧૦..

યદ્યન્ + યન્ + ન

અસ્મિઁલ્લોકે વર્તમાનઃ(સ્), સ્વધર્મસ્થોઽનઘઃ(શ્) શુચિઃ .

જ્ઞાનં(વ્ઁ) વિશુદ્ધમાપ્નોતિ, મદ્ભક્તિં(વ્ઁ) વા યદૃચ્છયા .. ૧૧..

સ્વધર્મસ્ + થોઽનઘઃ(શ્), વિશુદ્ધ + માપ્ + નોતિ

સ્વર્ગિણોઽપ્યેતમિચ્છન્તિ, લોકં(ન્) નિરયિણસ્તથા .

સાધકં(ઞ્) જ્ઞાનભક્તિભ્યા-મુભયં(ન્) તદસાધકમ્ .. ૧૨..

સ્વર્ગિણોઽપ્ + યે + તમિચ્છન્તિ, નિરયિ + ણસ્તથા

ન નરઃ(સ્) સ્વર્ગતિં(ઙ્) કાં(ઙ્)ક્ષેન્-નારકીં(વ્ઁ) વા વિચક્ષણઃ .

નેમં(લ્ઁ) લોકં(ઞ્) ચ કાં(ઙ્)ક્ષેત, દેહાવેશાત્ પ્રમાદ્યતિ .. ૧૩..

એતદ્ વિદ્વાન્ પુરા મૃત્યો-રભવાય ઘટેત સઃ .

અપ્રમત્ત ઇદં(ઞ્) જ્ઞાત્વા, મર્ત્યમપ્યર્થસિદ્ધિદમ્ .. ૧૪..

મર્ત્ય + મપ્યર્થ + સિદ્ધિદમ્

છિદ્યમાનં(ય્ઁ) યમૈરેતૈઃ(ખ્), કૃતનીડં(વ્ઁ) વનસ્પતિમ્ .

ખગઃ(સ્) સ્વકેતમુત્સૃજ્ય, ક્ષેમં(ય્ઁ) યાતિ હ્યલમ્પટઃ .. ૧૫..

સ્વકે + તમુત્ + સૃજ્ય

અહોરાત્રૈશ્છિદ્યમાનં(મ્), બુદ્ધ્વાઽઽયુર્ભયવેપથુઃ .

મુક્તસં(ઙ્)ગ(ફ્) પરં(મ્) બુદ્ધ્વા, નિરીહ ઉપશામ્યતિ .. ૧૬..

અહોરાત્રૈશ્ + છિદ્યમાનં(મ્), બુદ્ધ્વાઽઽયુર્ + ભયવે + પથુઃ

નૃદેહમાદ્યં(મ્) સુલભં(મ્) સુદુર્લભં(મ્)

પ્લવં(મ્) સુકલ્પં(ઙ્) ગુરુકર્ણધારમ્ .

મયાનુકૂલેન નભસ્વતેરિતં(મ્)

પુમાન્ ભવાબ્ધિં(ન્) ન તરેત્ સ આત્મહા .. ૧૭..

નૃદે + હમાદ્યં(મ્), નભસ્ + વતેરિતં(મ્)

યદાઽઽરમ્ભેષુ નિર્વિણ્ણો, વિરક્તઃ(સ્) સં(યઁ)યતેન્દ્રિયઃ .
અભ્યાસેનાત્મનો યોગી, ધારયેદચલં(મ્) મનઃ .. ૧૮..

ધારયે + દચલં(મ્)

ધાર્યમાણં(મ્) મનો યર્હિ, ભ્રામ્યદાશ્વનવસ્થિતમ્ .
અતન્દ્રિતોઽનુરોધેન, માર્ગેણાત્મવશં(ન્) નયેત્ .. ૧૯..

ભ્રામ્યદાશ્ + વન + વસ્થિતમ, અતન્દ્રિતોઽ + નુરોધેન

માર્ગેણાત્ + મવશં(ન્)

મનોગતિં(ન્) ન વિસૃજેજ્- જિતપ્રાણો જિતેન્દ્રિયઃ .
સત્ત્વસમ્પન્નયા બુદ્ધ્યા, મન આત્મવશં(ન્) નયેત્ .. ૨૦..

સત્ત્વસમ્ + પન્ + નયા

એષ વૈ પરમો યોગો, મનસઃ (સ્) સં(ઙ્)ગ્રહઃ(સ્) સ્મૃતઃ .
હૃદયજ્ઞત્વમન્વિચ્છન્, દમ્યસ્યેવાર્વતો મુહુઃ .. ૨૧..

હૃદય + જ્ઞત્વ + મન્વિચ્છન્ , દમ્યસ્ + યેવાર્ + વતો

સાં(ઙ્)ખ્યેન સર્વભાવાનાં(મ્), પ્રતિલોમાનુલોમતઃ .
ભવાપ્યયાવનુધ્યાયેન્ - મનો યાવત્ પ્રસીદતિ .. ૨૨..

પ્રતિલોમા + નુલોમતઃ, ભવાપ્ + યયાવનુ + ધ્યાયેન્

નિર્વિણ્ણસ્ય વિરક્તસ્ય, પુરુષસ્યોક્તવેદિનઃ .
મનસ્ત્યજતિ દૌરાત્મ્યં(ઞ્), ચિન્તિતસ્યાનુચિન્તયા .. ૨૩..

પુરુષસ્ + યોક્ત + વેદિનઃ, મનસ્ + ત્યજતિ

ચિન્ + તિતસ્ + યાનુચિન્તયા

યમાદિભિર્યોગપથૈ-રાન્વીક્ષિક્યા ચ વિદ્યયા .
મમાર્ચોપાસનાભિર્વા, નાન્યૈર્યોગ્યં(મ્) સ્મરેન્મનઃ .. ૨૪..

યમા + દિભિર્ + યોગપથૈ, રાન્વી + ક્ષિક્યા

મમાર્ + ચોપા + સનાભિર્વા

યદિ કુર્યાત્ પ્રમાદેન, યોગી કર્મ વિગર્હિતમ્ .

યોગેનૈવ દહેદં(મ્)હો, નાન્યત્તત્ર કદાચન .. ૨૫..

નાન્યત્ + તત્ર

સ્વે સ્વેઽધિકારે યા નિષ્ઠા, સ ગુણઃ(ફ્) પરિકીર્તિતઃ .

કર્મણાં(ઙ્) જાત્યશુદ્ધાના-મનેન નિયમઃ(ખ્) કૃતઃ .

ગુણદોષવિધાનેન, સં(ઙ્)ગાનાં(ન્) ત્યાજનેચ્છયા .. ૨૬..

ત્યા + જનેચ્છયા

જાતશ્રદ્ધો મત્કથાસુ, નિર્વિણ્ણઃ(સ્) સર્વકર્મસુ .

વેદ દુઃખાત્મકાન્ કામાન્, પરિત્યાગેઽપ્યનીશ્વરઃ .. ૨૭..

પરિ + ત્યાગેઽપ્ય + નીશ્વરઃ

તતો ભજેત માં(મ્) પ્રીતઃ(શ્), શ્રદ્ધાલુર્દૃઢનિશ્ચયઃ .

જુષમાણશ્ચ તાન્ કામાન્, દુઃખોદર્કાં(મ્)શ્ચ ગર્હયન્ .. ૨૮..

શ્રદ્ધાલુર્ + દૃઢનિશ્ચયઃ

દુઃખો + દર્ + કાં(મ્)શ્ચ

પ્રોક્તેન ભક્તિયોગેન, ભજતો માસકૃન્મુનેઃ .

કામા હૃદય્યા નશ્યન્તિ, સર્વે મયિ હૃદિ સ્થિતે .. ૨૯..

ભિદ્યતે હૃદયગ્રન્થિશ્ - છિદ્યન્તે સર્વસં(મ્)શયાઃ .

ક્ષીયન્તે ચાસ્ય કર્માણિ, મયિ દૃષ્ટેઽખિલાત્મનિ .. ૩૦..

હૃદય + ગ્રન્થિશ્

તસ્માન્મદ્ભક્તિયુક્તસ્ય, યોગિનો વૈ મદાત્મનઃ .

ન જ્ઞાનં(ન્) ન ચ વૈરાગ્યં(મ્), પ્રાયઃ(શ્) શ્રેયો ભવેદિહ .. ૩૧..

તસ્માન્ + મદ્ + ભક્તિ + યુક્તસ્ય

યત્ કર્મભિર્યત્તપસા, જ્ઞાનવૈરાગ્યતશ્ચ યત્ .

યોગેન દાનધર્મેણ, શ્રેયોભિરિતરૈરપિ .. ૩૨..

કર્મભિર્ + યત્ + તપસા, શ્રેયો + ભિરિ + તરૈ + રપિ

સર્વં(મ્) મદ્ભક્તિયોગેન, મદ્ભક્તો લભતેઽઞ્જસા .

સ્વર્ગાપવર્ગં(મ્) મદ્ધામ, કથં(ઞ્)ચિદ્ યદિ વાઞ્છતિ .. ૩૩..

સ્વર્ગા + પવર્ગં(મ્)

ન કિં(ઞ્)ચિત્ સાધવો ધીરા, ભક્તા હ્યેકાન્તિનો મમ .

વાઞ્છન્ત્યપિ મયા દત્તં(ઙ્), કૈવલ્યમપુનર્ભવમ્ .. ૩૪..

કૈવલ્ય + મપુનર્ભવમ્

નૈરપેક્ષ્યં(મ્) પરં(મ્) પ્રાહુર્- નિઃ(શ્)શ્રેયસમનલ્પકમ્ .

તસ્માન્નિરાશિષો ભક્તિર્ - નિરપેક્ષસ્ય મે ભવેત્ .. ૩૫..

નિઃ(શ્)શ્રેય + સમ + નલ્પકમ્ , તસ્માન્ + નિરા + શિષો

ન મય્યેકાન્તભક્તાનાં(ઙ્), ગુણદોષોદ્ભવા ગુણાઃ .

સાધૂનાં(મ્) સમચિત્તાનાં(મ્), બુદ્ધેઃ(ફ્) પરમુપેયુષામ્ .. ૩૬..

મય્યેકાન્ + તભક્તાનાં(ઙ્) , ગુણ + દોષોદ્ + ભવા

એવમેતાન્ મયાઽઽદિષ્ટા- નનુતિષ્ઠન્તિ મે પથઃ .

ક્ષેમં(વઁ) વિન્દન્તિ મત્સ્થાનં(યઁ) યદ્ બ્રહ્મ પરમં(વઁ) વિદુઃ .. ૩૭..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)

સં(મ્)હિતાયાં(મ્) એકાદશસ્કન્ધે વિંશોઽધ્યાયઃ .. ૨૦..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ